सश्रीकहीरविजयाभिधसूरिरासीत् ॥ १ ॥
तत्पट्टे वरगुणमणिगणरोहणभूधराधरापीठे ।
सांप्रतमद्भुतयशसो विजयंते विजयसेनसूरिवराः ॥ २ ॥

गीतिः

वाचकचूडामणयः ॥ श्रीमंत(:) शांतिचंद्रनामानः ।
विद्यागुरवां(वो) विबुधा विजयंतां कमलविजयाश्च ॥ ३ ॥
एषां श्रीसुगुरु(रू)णां प्रसादतो नयनबाणरसचंद्रे(:) (१६५२) ।
प्रमे(मि)ते वर्षे रचिता वृत्तिरियं कनककुशलेन ॥ ४ ॥
प्रत्यक्षरं गणनया वृत्तौ संख्या निवेद्यते ।
संजाता षट्शती सार्द्धा (६५०) श्लोकानामिह मंगलं ॥ ५ ॥

अंकतो(ऽ)पि ६५० । ससूत्रवृत्ति ७२७ इति श्रीकल्याणमंदिरस्तोत्रवृत्तिः लिखिता 'तपा'गच्छे । पंडित५श्रीश्रीषीरसागरजी तत्शिख्ये(ष्ये)मु० कीर्त्तिसागरलिषितं 'पीयलाजं'नगरे संवत् गुणचालीसा वर्षे मिति कार्ति सुदि संध्यासमये ॥

N. B.— For other details see No. 98.

कल्याणमन्दिरस्तोत्रवृत्ति Kalyāṇamandirastotravṛtti

No. 101 1133. / 1887-91.

Size.— $9\frac{7}{8}$ in. by $4\frac{1}{8}$ in.

Extent.— 19 folios ; 13 lines to a page ; 49 letters to a line.

Description.— Country paper rather thin, smooth and whitish in colour ; Devanāgarī characters ; bold, legible, uniform and beautiful hand-writing ; borders not ruled ; red chalk and yellow pigment as well used ; foll. numbered as usual ; foll. 1^a and 19^b blank ; this Ms. contains the commentary only ; complete ; condition very good.

Age.— Saṁvat 1865.

Author.— Kanakakuśala Gaṇi. For details see No. 98 (p. 121).

Subject.— A Sanskrit commentary on Kalyāṇamandirastotra.

Begins.— fol. 1^b श्रीसंखेश्वरपार्श्वनाथाय नमः ॥ श्रीसद्गुरुभ्यो नमः ॥

प्रणम्य पार्श्वमित्य(ष्टा)र्थसार्थपूर्त्तिसुरद्रुमं etc. as in No. 98.

Ends.— fol. 19^a

प्रत्यक्षरं गणनया वृत्तौ संख्या निवेद्यते ।
संजाता षट्शती स(सा)र्द्धा (६५०) श्लोकानामिह मंगलं ॥ ५ ॥

ससूत्रवृत्तेर्ग्रंथाग्रं ७२७ इति श्रीकल्याणमंदिरस्तोत्रवृत्तिः संपूर्णा संवति परमेष्ठिदर्शनसिद्धिविधुभिः (१८६५) प्रमिते फाल्गुनमासि शुक्लपक्षे द्वादश्यां तिथौ रविवारे जंगमयुगप्रधानश्री१०८श्रीजिनचंद्रसूरयस्तच्छिष्यं-(ष्या): श्रीमंत(:) पाठकाग्रश्री१०५श्रीउदयतिलकजिद्गणयः तच्छिक्ष-(ष्य)मुख्यवाचनाचार्यश्री१०५श्रीअमरविजयजिद्गणयस्तच्छिष्योदारविमल-मनीषार्णवाः श्री१०५श्रीज्ञानवर्धनजिद्गणयस्तेषां शिष्येण सुधिया कीर्त्ति-कल्याणमुनिना लिखितमिदं पुस्तकं श्री'वी(बी)कानेर'मध्ये चिरं रायचंद्रस्य पठनाय ॥ श्रीः स्तात् सद्गुरुप्रसादात् श्रीः श्रीः

Reference.— Published. See No. 81.

N. B.— For other details see Nos. 81 and 98.

कल्याणमन्दिरस्तोत्र
व्याख्यालेशसहित

No. 102

Kalyāṇamandirastotra
with vyākhyāleśa
708.
1899–1915.

Size.— $10\frac{1}{8}$ in. by $4\frac{1}{4}$ in.

Extent.— 10 folios; 17 lines to a page; 58 letters to a line.

Description.— Country paper very thin, brittle and grey in colour; Devanāgari characters with पृष्ठमात्राs; legible, bold, uniform and elegant hand-writing; borders ruled in three to four lines in black ink; foll. numbered as usual; foll. 1^a & 10^b blank; edges of the first fol. worn out; the right-hand margins of the remaining foll. partly eaten up by white ants; condition fair; this Ms. contains both the text and the commentary; both complete; red chalk used.

Age.— Saṁvat 1716.

Author of the commentary.— Pāṭhaka Harṣakīrti, pupil of Candrakīrtī Sūri of the Nāgapurīya Tapā gaccha. This Harṣakirti has composed the following works:[2]—

(1) धातुपाठ of सारस्वत व्याकरण (Saṁvat 1663).
(2) योगचिन्तामणि (see Vol. XVI, pt. 1, Nos. 158-161).
[1]alias वैद्यकसारोद्धार (see Vol. XVI, pt. 1, Nos. 256–258).
(3) शारदीयनाममाला.

Further, he has commented upon the following works[2]:

(1) अजियसन्तिथव (see Vol. XVII, pt. 4, Nos. 1183 & 1184).
(2) उवसग्गहरथोत्त (see Vol. XVII, pt. 3, Nos. 784 & 785).
(3) [3]धातुपाठ.
(4) नवकारमंत (see Vol. XVII, pt. 3, Nos. 744 & 745).
(5) बृहच्छान्तिस्तव (see Vol. XVII, pt. 4, Nos. 1282 & 1283).

---

1 See *Jinaratnakośa* (Vol. I, p. 365).

2 Five of them are noted by me in Vol. XVII, pt. 5, p. 19.

3 The commentary on this work is by the author himself, and it is named as *Dhātutaraṅgiṇī*.

(6) लघुशान्तिस्तोत्र (see Vol. XVII, pt. 4, Nos. 1300 & 1301).

(7) श्रुतबोध.

(8) सिन्दूरप्रकर.

(9) सेट्-अनिट्-कारिका.

Sārasvata-dīpikā, a commentary on *Sārasvata vyākaraṇa*, is a work of Harṣakīrti according to SHJL (p. 593) but according to *Jinaratnakośa* (Vol. I, p. 433) it is the work of Candrakīrti Sūri who composed it in Saṁvat 1664.

Subject.— The text together with a Sanskrit commentary giving a narrative of the origin of the hymn. The Ms. No. 103 contains this very commentary, and this Ms. is dated as Saṁvat 1635. If this date is really correct, Nos. 102–105 ought to be assigned a place prior to that of No. 98, and the date of this commentary given in *Jaina Granthāvalī* (p. 275) as Saṁvat 1688 should be looked upon as wrong, and in that case this commentary should be dated as " not later than Saṁvat 1635 ".

Begins.— (text) fol. 1b

कल्याणमंदिरमुदार etc. as in No. 81.

„ — (com.) fol. 1b ए ६० ॥ श्रीगुरवे नमः ॥

श्रीमत्पार्श्वजिनं नत्वा बालानां बोधहेतवे ॥
कल्याणमंदिरस्तोत्रे व्याख्यालेशो विधीयते ॥ १ ॥

Ends.— (text) fol. 9b जननयन etc. up to प्रपद्यंते ४४ as in No. 81.

„ — (com.) fol. 10a श्रीमन्नागपुरीयकाह्वय etc. up to समाप्ता as in No. 103. This is followed by the lines as under:-

संवति १७१६ वर्षे चैत्र सुदि ८ दिने लिखितं श्रीसमयनिधानेन
' सरस्वतीपत्तने ' ॥ ग्रंथसंख्या ५५० ॥

N. B.— For other details see No. 81.

Reference.— For additional Mss. of this commentary see Jinaratnakośa (Vol. I, p. 80).

कल्याणमन्दिरस्तोत्र
व्याख्यालेशसहित

Kalyāṇamandirastotra
with vyākhyāleśa

No. 103

1252.
1891-95.

Size.— $10\frac{1}{4}$ in. by $4\frac{1}{8}$ in.

Extent.— 13 folios ; 15 lines to a page ; 48 letters to a line.

Description.— Country paper thick and grey for all foll. except the first; this first foll. is white; Devanāgarī characters ; borders of all the foll. except the first ruled in two thick lines in red ink; space between them coloured yellow; foll. numbered as usual ; foll. 2 to 13 decorated with figures : some with one in the centre, and some with three ; some have circular discs in the margins, etc.; red chalk used profusely ; this Ms. contains the text and commentary ; the latter complete ; it was composed at the instance of Mahopādhyāya Devasundara, the first fol. most probably added later on perhaps with a view to replacing the missing one; for, it differs from the rest in hand-writing, ruling of the borders, decoration of the foll. etc. ; a few lines of fol. 1^b written also on fol. 1^a ; the verses of the original hymn supplied most probably later on by some one at the top, the bottom and in the margin of foll.commencing from the 3rd; however the first two verses do not seem to be supplied ; condition on the whole good.

Age.— Saṁvat 1635.

Begins.— (text) fol. 3^a (सामान्यतोऽपि तव etc.)

„ — (com.) fol. 1^b श्रीपार्श्वनाथाय नमः ॥

श्रीमत्पार्श्वं जिनं नत्वा बालानां बोधहेतवे ॥
कल्याणमंदिरस्तोत्रे व्याख्यालेशो विधीयते ॥ १ ॥ etc.

Ends.— (text) fol. 13^a

जननयन etc. as in No. ६१.

„ — (com.) fol. 13^b

श्रीमन्'नागपुरीयका'ह्वयंतपा'गच्छाधिपाः सत्क्रियाः ।
सूरिश्रीप्रभुचंद्रकीर्त्तिगुरवस्तेषां विनेयो वरां ।

व्याख्यां पाठकहर्षकीर्त्तिरकरोत् कल्याणसद्मस्तवे ।
मेधामंदिरदेवसुंदरमहोपाध्यायराजाग्रहात् ॥ १ ॥
यत्किंचिन्मतिमंदत्वाद् यच्चात्रानवधानतः ।
व्याख्यातं वैपरीत्येन । तद् विशोध्यं विचक्षणैः ॥ २ ॥
शृ(शृ)ण्वतां एव तां चेमां । नृणां वाचयतामपि ॥
कल्याणं विपुलं भूयात् । पार्श्वनाथप्रसादतः ॥ ३ ॥

इति श्रीकल्याणमंदिरस्तोत्रस्य टीका संपूर्णाः ॥ ॥ संवत् १६३५ वर्षे । श्रीमद्‘दंडुसूकपुर’प्रवरे । देवनाचार्यवर्यश्रीधर्मसुंदरगणीनां शिष्यश्रीवा० धर्ममेरुगणि । तच्छिष्य पं० लवधि(ब्धि)रत्नमुनिना(ऽ)लेखि । स्ववाचनायः ॥ श्रीरस्तु नः ।

N. B.— For other details see No. 102.

कल्याणमन्दिरस्तोत्र व्याख्यालेश सहित — **Kalyāṇamandirastotra with vyākhyāleśa**

No. 104 — 422. / 1882-83.

Size.— 10 in. by $4\frac{1}{4}$ in.

Extent.— 12 folios ; 17 lines to a page ; 46 letters to a line.

Description.— Country paper thin but not very brittle and grey ; Devanāgarī characters ; bold, legible but poor handwriting ; borders ruled in three lines in red ink ; red chalk and yellow pigment used ; foll. numbered as usual ; fol. 1^a blank ; this Ms. contains the text as well as the commentary but both incomplete as this Ms. deals with only 39 verses out of 44 ; condition very good.

Age.— Pretty old.

Author of the commentary.— Harṣakīrti as can be inferred on comparing this Ms. with No. 105 and on noticing श्रीमत्पार्श्वजिनं नत्वा written on fol. 1^b as a different reading.

Begins.— (text) fol. 2^b

कल्याणमंदिरमुदार etc, as in No, 81,

Begins— (com.) fol. 1[b] श्रीगुरवे नमः ॥

प्रणिपत्य जिनं पार्श्वं बालानां बोधहेतवे ।
कल्याणमंदिरस्तोत्रे व्याख्यालेशो विधीयते ॥ १ ॥ etc.

Ends.—(text) fol. 12[b]

हे नाथ ! दुःखिजनवत्सल ! हे शरण्य ! etc. (v. 39)

„ — (com.) विधेहि कुरु दुःखस्य अंकुरा उत्पत्तिकारणानि (ends abruptly).

N. B.— For further particulars see No. 102.

कल्याणमन्दिरस्तोत्र-
व्याख्यालेश

Kalyāṇamandirastotra-
vyākhyāleśa

No. 105 — 1225. / 1886-92.

Size.— 9¾ in. by 4 in.

Extent.— 13 folios ; 14 lines to a page ; 46 letters to a line.

Description.— Country paper thick, rough and grey ; Devanāgarī characters ; bold, legible and tolerably good hand-writing ; borders ruled in two lines in red ink ; red chalk used ; yellow pigment, too ; foll. numbered as usual ; fol. 1[a] blank ; this Ms. contains the commentary only ; it commences on fol. 1[b] ; complete; condition very good.

Age.— Pretty old.

Begins.— fol. 1[b] श्रीगौतमाय नमः ॥

श्रीमत्पार्श्वजिनं नत्वा etc. as in No. 102.

Ends. – fol. 13[b]

श्रीमन्नागपुरी(य)तपाह्वय etc. up to टीका as in No. 102.
This is followed by the line as under :—

समाप्ता जाता[ः] ॥

N. B.— For other details see No. 102.

कल्याणमन्दिरस्तोत्र
टीका सहित

Kalyāṇamandirastotra
with ṭikā

No. 106

575 ( ).
1875-76.

Extent.— fol. 60^b to fol. 74^b.

Description.— Complete. For other details see No. $\frac{672.}{1875\text{-}76.}$

Age.— Saṁvat 1780.

Author of the commentary.— Not mentioned.

Subject.— The text with a commentary in Sanskrit.

Begins.— (text) fol. 60^b

कल्याणमंदिरमुदार etc. as in No. 81.

„ — (com.) fol. 60^b स्तवं चिकीर्षुकामः विघ्नविनिवृत्तये मंगलमाचरन्नाह etc.

Ends.— (text) fol. 74^a

जननयन etc. up to प्रपद्यंते ॥ ४४ ॥ as in No. 81. This is followed by the lines as under :-

इति श्रीकुमुदचंद्राचार्यकृतं श्रीकल्याणमंदिरस्तोत्रटीका संपूर्णं ॥ संवत १७८०वर्षे फाल्गुणवदि ५ श्री'सूर्यपुर'मध्ये लिपीकृतं ॥ श्री'काष्ठा'संघे 'माथुर'गच्छे 'पुष्कर'गणे लोहाचार्याम्नाये भ। श्रीसुरेंद्रकीर्तिनइ आम्नाये श्री'नरसिंहपुरा'ज्ञातीयसाश्रीयोगीदास तत्भार्या उभयकुलानंददायिनी बाई इंद्राणी तत्पुत्र साश्रीनेमीदास तस्य भार्या बाई आणंद तत्पुत्र सा। भगवानचंद तथा गुलालचंद तथा केसुरदास एतेषां मध्ये सा नेमीदास योगीदास सुत ज्ञानावर्णिकर्मक्षयार्थे इदं शास्त्रं लिखापितं परोपकारार्थे शुभं भवतु ॥

„ — (com.) fol. 74^a तत(ब) बिंबं त्वद्बिंबं तस्य निर्म्मलं यन्मुखांबुजं मुखकमलं तत्र बद्धं लक्ष्यं येस्ते ॥ ४३ ॥

N. B.— For other details see No. 81.

कल्याणमन्दिरस्तोत्र अवचूरि सहित — Kalyāṇamandirastora with avacūri

No. 107 — 1226. / 1886-92.

Size.— $10\frac{1}{2}$ in. by $4\frac{1}{2}$ in.

Extent.— 15 folios ; 12 lines to a page ; 37 letters to a line.

Description.— Country paper sufficiently thick, durable and grey in colour ; Devanāgarī characters ; bold, legible, uniform, big and beautiful hand-writing ; borders ruled singly but thickly in red ink & surrounded by two pairs of black lines; red chalk used ; yellow pigment, too ; foll. numbered as usual ; fol. 1^a blank ; small strips of paper pasted to some of the foll. ; condition very fair ; this Ms. contains the text and the commentary as well ; both complete.

Age.— Pretty old.

Author of the avacūri.— Not mentioned.

Subject.— The text with a small commentary in Sanskrit.

Begins.— (text) fol. 1^b श्री

कल्याणमंदिर etc. as in No. 81.

" — (com.) fol. 1^b अथ व्याख्या । किल इति सत्ये । एषः अहं सिद्धसेनदिवाकरस्तस्य भगवतः श्रीपार्श्वनाथस्य स्तवनं स्तोत्रं करिष्ये विधास्यामि । etc.

Ends.— (text) fol. 15^a

जननयन etc. as in No. 81.

" — (com.) fol. 15^b विगलितो गतो मलो(ल)निचयो मलसमूहो येषां ते विगलितमलनिचयाः ४४ इति श्रीकल्याणमंदिरस्तोत्रावचूरी(रिः) समाप्त(प्ता) श्रीरस्तु ॥

N. B.— For further particulars see No. 81.

कल्याणमन्दिरस्तोत्र
टिप्पण सहित

Kalyāṇamandirastotra
with ṭippaṇa

No. 108 $\frac{94\ (2)}{1898\text{–}99}$.

Extent.— fol. 7ᵃ to fol. 11ᵇ.

Description.— Complete. For other details see Bhaktāmarastotra with ṭippaṇa No. $\frac{94\ (1)}{1898\text{–}99}$.

Author of the ṭippaṇa.— Not mentioned.

Subject.— The text together with a small commentary in Sanskrit.

Begins.— (text) fol. 7ᵃ ५५० ॥

कल्याणमंदिरमुदार etc. as in No. 81.

,,—(ṭippaṇa) fol. 7ᵃ कल्याणानां समस्तमंगलानां मंदिरं गृहं स्थानमित्यर्थः etc.

Ends.— (text) fol. 11ᵇ

जननयनकुमुद etc. up to मोक्षं प्रपद्यंते ॥ as in No. 81. This is followed by the line as under :—

॥ ४५ ॥ इति श्रीकल्याणमंदिरस्तोत्रं समाप्तमिति ॥ छ ॥

,,— (ṭippaṇa) fol. 11ᵇ मोक्षं अनंतज्ञानदर्शनसुखवीर्यस्वरूपं निःश्रेयसं २ ते भव्याः प्राप्नुवंतीत्यर्थः

N. B.— For additional information see No. 81.

कल्याणमन्दिरस्तोत्र
अवचूरि सहित

Kalyāṇamandirastotra
with avacūri

No. 109 $\frac{1440\ (b)}{1886\text{–}92}$.

Extent.— fol. 12ᵇ to fol. 20ᵇ.

Description.— Both the text and the commentary complete ; the former containins 44 verses. For other details see भक्तामरस्तोत्र with अवचूरि No. $\frac{1440\ (a)}{1886\text{–}92}$.

Author of the avacūri.— Not mentioned.

Subject.— The text along with a small commentary in Sanskrit.

Begins.— (rext) fol. 12^b

कल्याणमंदिरमुदार etc. as in No. 81.

,,—(com.) fol. 12^b ॥ ६० ॥ स्तवं चिकीर्षुकामः विघ्नविनिवृत्तये मंगलमाचरन्नाह ॥ किलेति । संभाव्यते एषो(ऽ)हं कविस्तस्य जगत्प्रसिद्धस्य जिनेश्वरस्य श्रीपार्श्वनाथतीर्थंकरपरमदेवस्य अंह्रिपद्मं चरणकमलं अभिवंद्य प्रणिपत्य संस्तवनं सम्यक् स्तोत्रं करिष्ये । करिष्यामीत्यर्थः ॥ कथंभूतं अंह्रिपद्मं ॥ कल्याणानां मांगल्यराशीनां मंदिरं निकेतनमित्यर्थः ॥

Ends.— (text) fol. 20^b

इत्थं समाहितधियो विधिवज्जिनेंद्र !
सांद्रोल्लसत्पुलककंचुकितांगभागाः ॥
त्वद्बिंबनिर्मलमुखांबुजबद्धलक्ष्म्याः(क्ष्याः) ॥
ये संस्तवं तव विभो ! रचयंति भव्याः ॥ ४३ ॥
जननयनकुमुदचंद्रप्रभास्वराः स्वर्गसंपदो भुक्त्वा ॥
ते विगलितमलनिचया । अचिरान्मोक्षं प्रपद्यंते ॥ ४४ ॥

इति श्रीकुमुदचंद्राचार्यकृतं कल्याणमंदिरनामश्रीपार्श्वदेवस्तवनं संपूर्णं ॥ शुभं भवतु ॥

,, — (com.) fol. 20^b जनानां भव्यानां नयनान्येव कुमुदानि कैरवाणि तत्र चंद्रस्तस्यामंत्रणे । हे जननयनकुमुदचंद्र ! ते भव्याः स्वर्गसंपदो भुक्त्वा ॥ स्वर्गसाम्राज्यं परिभुज्य अचिरात् स्वल्पकालेन मोक्षं प्रपद्यंते लभंते ॥ कीदृशाः स्वर्गसंपदः ॥ प्रभास्वराः ॥ प्रकर्षेण भास्वराः देदीप्यमानाः ॥ कथंभूता भव्या ॥ विगलिताः मलानां निचया येषां ते ॥ ४४ ॥ छ ॥ छ ॥ छ ॥ इति श्रीकुमुदचंद्राचार्यकृतं कल्याणमंदिरनामश्रीपार्श्वदेवस्तवनस्यावचूरिः समाप्तः ॥ श्री ॥ २ ॥ श्री ॥ ॐ नमो भगवते श्रीपार्श्वनाथतीर्थंकराय ॥ छ ॥

N. B.— For further details see No. 81.

कल्याणमञ्जरी — Kalyāṇamañjarī

[कल्याणमन्दिरस्तोत्रटीका] — [Kalyāṇamandirstotraṭīkā]

No. 110 — 1132. / 1887–91.

Size.— $9\frac{1}{2}$ in. by $4\frac{1}{8}$ in.

Extent.— 15-2=13 folios ; 11 lines to a page ; 37 letters to a line.

Description.— Country paper very thick, tough and quite grey in colour ; Devanāgarī characters ; bold, legible, big and good hand-writing ; red chalk used ; foll. numbered as usual; the first two foll. missing; this Ms. does not contain the original hymn ; it deals with the commentary only and notes प्रतीकs of the original hymn ; complete ; condition very good.

Age.— Not modern.

Author.— Not mentioned.

Subject.— A Sanskrit commentary of Kalyāṇamandirastotra. It is named as Kalyāṇamañjarī. In the end the author of the original text is named as Kumudacandra Sūri.

Begins.— fol. 3^a एतावतैतन्मंत्रस्मरणाद्द रणेऽपि जयो भवतीत्यर्थः आरमिति इगंताच्च लघुपूर्व्वादित्यत्र त्रित्वाद्द वृद्धिः । etc. (this is the concluding portion of the com. to the 2nd verse).

Ends.— fol. 15^b स्त्रोत्रकरणफलप्राप्तिमाह ॥ जननयनेति । etc. किंविशिष्टा भव्याः । विगलितो दूरीभूतो मलनिचयः पापसमूहो येषां ते तादृशाः । ४४ ॥

इति सकलकुमतकुमुदषंडचंडचंडरश्मिश्रीकुमुदचंद्रसूरिविरचितश्रीकल्याणमंदिरस्तोत्रस्य कल्याणमंजरीटीका संपूर्णः ॥ etc.

कल्याणमन्दिरस्तोत्रावचूरि Kalyāṇamandirastotrāvacūri

No. 111 149. / 1872-73.

Size.— $10\frac{3}{8}$ in. by $4\frac{3}{8}$ in.

Extent.— 6 folios ; 17 lines to a page ; 48 letters to a line.

Description.— Country paper thin and white ; Devanāgarī characters with occasional पृष्ठमात्राs ; small, legible, uniform and good hand-writing ; borders ruled in three lines in red ink ; red chalk used ; foll. numbered in the right-hand margin only; edges of almost all the foll. slightly damaged ; condition on the whole very good ; complete.

Age.— Fairly old.

Author.— Guṇaratna Sūri.

Subject.— A small commentary of Kalyāṇamandirastotra.

Begins.— fol. 1[a] श्रीसर्वज्ञाय ॥

कल्याण० यस्य० रागादिशत्रूणां जेतारो जिनास्तेषामीश्वरो जिनेश्वरस्तस्यांह्रिपद्मं ॥ etc.

Ends.— fol. 6[b] अत्र च स्तवने महाकविकृते प्रायः प्रतिवृत्तं मन्त्रादयः संभाव्यंते परं तथाविधाम्नायाभावान्नाभिहिताः स्वयं तु ते ज्ञातव्याः सुगुरुप्रसादात् ॥ ४४ ॥ सुगमं इति श्रीकल्याणमंदिरस्तवावचूरिः समाप्ता श्रीगुणरत्नसूरिकृता ॥ छ ॥ etc.

Reference.— See Jinaratnakośa (Vol. I, p. 81).

कल्याणमन्दिरच्छायास्तोत्र Kalyāṇamandiracchāyāstotra

No. 112 911 (e). / 1892-95.

Extent.— fol. 79[b] to fol. to 80[b].

Description.— Complete. For other details see No. 911 (a). / 1892-95.

Author.— Muni Ratna. He is also an author of Bhaktāmaracchāyāstotra.

Subject.— This is a small poem in 45 verses in Sanskrit in the usual Anuṣṭubh metre embodying the substance of the well-known Kalyāṇamandirastotra (vide No. 81).

Begins.— fol. 79[b]

श्रेयोबीजमवधारी । प्रणिपत्याभयप्रदौ ।
भवाब्धौ पतत्तामर्हत्पादौ प्रकृतिपोतितौ ॥ १ ॥ etc.

Ends.— fol. 80[b]

इत्येष किल कल्याणमंदिरानुगचेतसा ।
रत्नेन मुनिना नूतः श्रीपार्श्वपरमेश्वरः ॥ ४५ ॥
इदं कल्याणमंदिरच्छायास्तोत्रं पुरुषादानीयस्य ॥

Reference.— Published along with Bhaktāmara, Kalyāṇamandira and Namiuṇa stotras in the D. L. J. P. F. Series, No. 79 on pp. 246-249 in A. D. 1932.

This very Ms. is noted in Jinaratnakośa (Vol. I, p. 80). There the name of the author is mentioned as Malliṣeṇa but it is wrong.

कल्याणमन्दिरस्तोत्रभाषा Kalyāṇamandirastotrabhāṣā

No. 113 673 (36). / 1895-98.

Extent.— fol. 96^{b} to fol. 100^{b}.

Description.— Complete. For further details see क्षेत्रपालपूजा No. 673 (1). / 1895-98.

Author.— V(? B)anārasī. Is he Digambara ? If so, this work should be included in the section for the Digambara hymns.

Subject.— A Hindī rendering of Kalyāṇamandirastotra.

Begins.— fol. 96^{b} अथ **कल्याणमंदिरकी भाषा** लिषते ॥

परम जोती परमातमा ॥ परम जानि परवीन ।
वंदौ परमानंदमय । घटि घटि अंतरलीन ॥ १ ॥ etc.

चौपई ॥

निरभयकरण परम परधान भवसमुद्रजलतारन जांन ।
सिवमंदिर अघहरणानंद । वंदौ **पार्स्वचरणअरविंद** ॥ २ ॥

Ends.— fol. 100^{b}

ईह **कल्याणमंदिर** कीये । कुमुदचंदकी बुध्दि ।
भाषा करत व(ब)नारसी ॥ कारण समकित सुद्ध(द्धि) ॥ ४५ ॥
इति श्रीकल्याणमंदिरकी भाषा संपूर्ण समाप्ता ॥

Reference.— In the [1]edition of "कल्याणमन्दिरस्तोत्र" containing Devendrakīrti's कल्याणमन्दिरपूजा etc. and published by "कुन्थुसागर-स्वाध्याय-सदन" in Vīra Saṁvat 2478, we come across this work, but it starts with v. 2 given here.

कुरुकुल्लास्तुति Kurukullāstuti

No. 114 333 (5). / A. 1882-83.

Extent.— fol. 2^{a}.

Description.— Complete ; 9 verses in all. For other details see Vītarāganamaskāra No. 333 (1). / A. 1882-83.

1 See p. 107.

Author.— Vādin Deva Sūri. For details see Vol. XVIII, pt. I, p. 50.

Subject.— Glorification of Kurukullā, a goddess.

Begins.— fol. 2^a ॥

प्रणवहृदि यदीयं नाम मायासमिद्धं
वहसि षडरलीनामातृकोपांतरौद्रे ! ।
भगवति ! कुरुकुल्ले ! तं गलद्रोगराजं
निरुदयमपि भूता नैव लुंपंति भू(लू)ताः ॥ १ ॥
कमलति कपिकच्छू(च्छू)मांल्य(ल)ति व्यालपाली
तुहिनति दववह्निर्मांथ(घ)ति ग्रीष्मकालः ।
शिशिरकरति शू(सू)रः क्षीरति क्षारनीरं
विषमसृतति मातस्त्वत्प्रभावेन पुंसां ॥ २ ॥

Ends.— fol. 2^a

प्रतिविषयमजस्रं स्वेच्छया गछ(च्छ)देतद्
पवनविजययोगात् संनिरुध्य स्वाचित्तं ।
यदिह किमपि संतः संततं धाम पश्यं-
त्यावितथमयसुच्चैर्देवि ! युष्मत्प्रसादः ॥ ८ ॥
सकलकरणरोधाद् ध्यानलीनस्य पुंसः
स्फुरसि मनसि यस्यं त्वं महो(द्द)द्योतरूपा ।
सपदि विदलयंती तस्य जाड्यांधकारं
समुदयति समंताद् केवलज्ञानलक्ष्मीः ॥ ९ ॥
इति कुरुकुल्लास्तुतिः ॥

Reference.— Published in Jaina-stotra-samuccaya (pp. 230-232). A work named as Kurukullāstavana is noted in Jaina granthāvalī (p. 276).

कूटश्लोकचतुष्क
व्याख्या सहित

No. 115

Kūṭaślokacatuṣka
with vyākhyā
608 (b).
1892-95.

Extent.— fol. 7^a to fol. 7^b.

Description.— Both the text and the commentary complete; the former has 4 verses. For other details see अजितशान्तिस्तव with अवचूरि (Vol. XVII, pt. 4, No. 1181).

Author of the text.— Not mentioned.

„ „ „ commentary.— Somatilaka Sūri. No details about him are given here. So it remains to be ascertained whether he is one of the following three Sūris of this name or he is altogether a different monk :—

(i) Somatilaka Sūri of the Tapā *gaccha*, pupil of Somaprabha Sūri and *guru* of Jayānanda Sūri. Somatilaka became " Sūri " in Vikrama Saṁvat 1373. He is an author of *Navyakṣetrasamāsa*, *Vicārasūtra* & *Saptatiśatasthānaka* (Vikrama Saṁvat 1387) and a commentator of *Yamaka-stuti* composed by his *guru*.

(ii) Somatilaka Sūri (c. A. D. 1330) of Rudrapallīya *gaccha*, pupil of Saṅghatilaka Sūri.

(iii) Somatilaka Sūri of Candra *gaccha*, *guru* of Devasundara Sūri (c. A. D. 1370).

Subject. — There are four *kūṭa* verses which are given here under the heads ' begins ' and ' ends '. There is a commentary without which these verses are almost inexplicable. Of the four verses the third is an eulogy of Lord Viṣṇu. His various [1]incarnations are here alluded to. The last verse contains names of various articles of food such as घेवर, लापसी, घेस etc.

Begins.— (text) fol. 7^b

रावणेन विना सीता । सीतया रावणं विना ।
विना रावण(ण)सीताभ्यां रामोऽहं दशकंधरः ॥ छ ॥
न कासारो लंबतरंगनारं ।
नका सरो लंबत रंगतारं ॥
नकासरोलं बत रंगतारं ।
नकासरोलंबत रंगतारं ॥ २ ॥ etc.

„—(com.) fol. 7^b व्याख्या ॥ रावणेन विना सीता । प्यहारादनादनंतरं । वालिवानरेश्वर स्पी गजो । गं(अंग)दनामा सीतासाराकरणार्थं लंकां गतः ॥ etc.

Ends.— (text) fol. 8^a

पायाद्व् वः करणो(ऽ)रणो रणरणो राणो रणोवारणो
विष्णुर्जिष्णुरभीरभीरभ(भि?)रभीराभीरभासारभी(:) ।

---

1 They are:
कूर्म, वामन, नृसिंह, परशुराम, आदिवराह, बुद्ध, कृष्ण, राम and कल्किन्.

स श्रीमानुदयोदया(यो) दयदयो दी(दा)योदयोवो(?दे)दयो
लब्धा येन रमारमारमरमा रामारमा(:) सा रमा ॥ ३ ॥

धात्याघे बरलापसीम ! रमते श्रीस्त्वद्गुणो(णौ)घे सदा
म(?स)द्दानैरधिकूर(रु)दालिरुदंलधयुिः सुखं त्वा(त्व)ज्जि(ज्ज्ञ)षं(षः)।
चेतःसूरणुरायितुं सदवडांदोडी रुचिस्त्वद्रुचा
क्ष्मी(क्ष्मा)हिंसाकरदूधरीणः(ण!) भवतः श्लोको(के) रसो(ऽ)पि
प्रभो ! ॥ ४ ॥ शुभं

Ends.— (com.) fol. 8ª एवंविधो(ऽ)पि कामस्तव [1]कांत्यऽपेक्षया तृणप्राय। इति भावः। तथा हे प्रभो ! तव श्लोके यशसि रसः ॥ स्वहरणीयत्वं वर्तते ।

श्रीसोमातिलकसूरिकृतकाव्यार्थः ॥ ४ ॥

Reference.— The third verse with its Sanskrit elucidation occurs with feet 2 and 4 interchanged and दत्ता for लब्धा in Subhāṣitaratnabhāṇḍāgāra (p. 216).

The last verse along with an avacūri, is given in my Sanskrit introduction (pp. 20-21) to my edition of *Stuticaturviṁśatikā* published by the Āgamodaya Samiti in A. D. 1930.

केवलज्ञानकल्याणकस्तव — Kevalajñānakalyāṇakastava

No. 116 — 1252 (h). / 1886-92.

Extent.— fol. 4ª to fol. 4ᵇ.

Description.— Complete ; 17 verses in all. For other details see No. 12.

Author.— Not mentioned.

Subject.—Of the five *kalyāṇakas* (epoch-making events) associated with the life of every Jaina *Tīrthaṅkara*, the 4th pertains to omniscience, and it is here glorified.

---

1 In the Ms. we have: " कांत्यऽयंपेक्षया. " I think the dot on य indicates that it is redundant.

Begins.— fol. 4^a

केवलालोकसंक्रांतविश्वत्रय-
स्वैकवाक्यास्तनैकप्रजासंशय ।
बाढमप्यक्षमांगां निजांगामिमां
गोचरे चारयाम्यद्य ते संस्तुतः ॥ १ ॥
ध्यातवांस्त्वं यदा शुक्लभेदद्वयी-
मादिमां मोहनीयक्षयैकक्षमां ।
आविरासीत् तदा देवते ! केवलं
प्रातरैंद्र्यां दिशीवांशुमन्मंडलं ॥ २ ॥

Ends.— fol. 4^b

श्रीगणाधीश्वराणां त्रिपद्यर्पणात्
त्वं जगन्नाथ ! तीर्थप्रवृत्तिं यदा ।
आतनोषि स्म विस्मापितेंद्रव्रजं
भूरशेषा बभासे सनाथा ततः ॥ १६ ॥
इत्येवं केवलश्रीरभसभरपरीरंभलाभात्तशोभं
भक्तिप्रह्वामरेंद्रासुरनरनिकरारब्धपादाब्जसेवं ।
देवं यः स्तौति भक्त्या प्रतिदिवसमसौ पंचमज्ञानलक्ष्मी-
लीलासौख्यानि भुक्त्वा परमपदसु(?ख)खान्यप्यवाप्नोति तूष्णं(र्णं)
॥१७॥

इति ज्ञानकल्याणकस्तवः ॥ ४ ॥ छ ॥

Reference.— A Ms. of *Kevalajñānastavana* and that of *Kevalastavana* are noted respectively as Nos. 6681 and 7343 in the printed list of the Mss. of the Asiatic Society of Bengal in its Journal (Vol. IV) in A. D. 1908.

केवलज्ञानकल्याणकस्तव Kevalajñānakalyāṇakastava

No. 117 1154 (h). / 1887–91.

Extent.— fol. 4^b.

Description.— Complete. For other details see Arbudastha-Śrī-Ṛṣabhajinastavana No. 13.

Begins.— fol. 4^b

केवलालोकसंक्रांत etc. in No. 116.

Ends.— fol. 4^b

श्रीगणाधीश्वराणां । etc. up to मुखान्यप्यवाप्नोति तूर्णं ॥ as in No. 116. This is followed by the line as under :—

इति कल्याणकस्तवः ॥ छ ॥

N. B.— For other details see No. 116.

क्षेत्रपालच्छन्द Kṣetrapālacchanda

No. 118 575 (20). / 1895–98.

Extent.— fol. 24^b to fol. 25^a.

Description— Complate ; 14(?) verses in all. For other details see Namaskāramantra (Vol. XVII, pt. 3, No. 737).

Author.— Not mentioned.

Subject.— A hymn in honour of Kṣetrapāla (protector deity).

Begins.— fol. 24^b ॥ ६० ॥ श्रीक्षेत्रपालाय नमो नमः ॥

बावन वीर सुकरि अह वाणं ॥ रढि रावण गंजण रायाणं ॥
देवीसुत दैत्यादीवाणं ॥ योगी भोगी योधयुवाणं ॥ १ ॥
रण वनि रहित धापि राधी ॥ षेलिअ मलघण विष बाधि ॥
बूटक वदि किसण कडि बांधि ॥ सुधनी अष्वर तणा रस साधि ॥२॥ etc.

Ends.— fol. 25^a

षे० जिहां तालकं साल वाजित्र पाई ॥
तिहां भोग भोगेंदु^पूजा^ वसाई ॥
त्रठि त्रापडे चोपडें त्रोडिताल ॥ ११ ॥
षे० मसीते मसाणमंडामंसच्चावि ॥
वरि लापसी कुंद लुंदा चलावि ॥
दुषि घोर गराजि जिस्योपमेयमालं ॥ १२ ॥

षे० कलस ॥

षेचर चाकर वीर रमें भैरव भयंकर ॥
तेल ताल कंसाल धमक वज्जें पय घुग्घर ॥
गडे मडे मालेहकलल धाने गजमंगल ॥
तेल फूल सिंदूर धूप गगल मदभिंगल ॥

नारायण कहि नव निधि देयण ॥
झोलीयधर अंबरधरण ॥
हरत्ति या सुत दालिद्दहरण ॥
ते षेत्रपाल षलषटकरण ॥ १ ॥
इति श्रीषेत्रपालछंद संपूर्णमिदम् ॥

क्षेत्रपालस्तोत्र Kṣetrapālastotra
[भैरवाष्टक] [Bhairavāṣṭaka]

No. 119 $\frac{673\ (2).}{1895\text{–}98.}$

Extent.— fol. 3^b to fol. 4^b.

Description.— Complete ; 9 verses in all. For further details see क्षेत्रपालपूजा No. $\frac{673\ (1).}{1895\text{–}98.}$.

Author.— Not mentioned.

Subject.— Glorification of Kṣetrapāla Bhairava.

Begins.— fol. 3^b ॥ अथ क्षेत्रपालस्तोत्र ॥

यं यं यं यक्षराजं दशादिशिधिगतं भूमिकं पायमानं ।
सं सं सं संहारमूर्त्तिं शिरमुकुटजटाशेखरं चंद्रबिंबं ॥
दं दं दं दीर्घकायं विकृतनखमुखं उ(ऊ)र्ध्वरोमं करालं ॥
पं पं पं पापनाशं प्रणमति सततं भैरवं क्षेत्रपालं ॥ १ ॥

Ends.— fol. 4^b

इत्येवं भावयुक्त्या पठति निजधिया भैरवस्याष्टकं हि
विघ्नघ्नं दुःखनाशं ह्यसुरभयहरं शाकिनीडाकिनीनां ॥
सस्तेनव्याघ्रसर्प्पा करिमकरपयःशूकरव्यालकानां ॥
सर्व्वे विघ्ना विनाशं दुरितभयहरं चिंतितार्थस्य सिद्धिः ॥ ९ ॥
इति श्रीक्षेत्रपालस्तोत्रं संपूर्णं ॥ १ ॥

क्षेत्रपालस्तोत्र Kṣetrapālastotra

No. 120 $\frac{684\ (16).}{1895\text{–}98.}$

Extent.— fol. 35^b to fol. 37^a.

Description.— Complete ; 9 verses in all. For other details see Ṣoḍaśakaraṇapūjā-jayamālā No. $\frac{684\ (1)}{1895\text{–}98}$.

Begins.— fol. 35[b] अथ स्तोत्रं ॥

यं यं यं यक्षराजं etc. as in No. 119.

Ends.— fol. 36[b]

इत्येवं भावयुक्त्या etc. up to चिंतितार्थस्य सिद्धिः ॥ ९ ॥ as in No. 119. This is followed by the line as under :—

इति क्षेत्रपालस्तोत्रं समाप्तं ॥

N. B.— For additional information see No. 119.

गणपतिपाहाडगतिच्छन्द Gaṇapatipāhāḍagaticchanda

No. 121 $\frac{575\ (39)}{1895\text{–}98}$

Extent.— fol. 34[b] to fol. 35[a].

Description.— Complete ; 9 verses in all. For other details see Namaskāramantra (Vol. XVII, pt. 3, No. 737).

Author.— Acala (?)

Subject.— A hymn in honour of Gaṇapati, son of Mahādeva and Pārvatī.

Begins.— fol. 34[b]

लीलावंत ललित गुणवेशर
शिर सिंदूरसोभित कर सुंदर ॥
पारवती-संकर-सुत सेवो
ऋद्धि सिद्धि बुद्धि आपे गुणु देवो ॥ १ ॥
सोहणसंजणकरण विनायक
राजकाज सेवो सुखदायक ॥
तेत्रीसां थुनि(?) धमनि भणीजे
प्रथम विनायकपूजा कीजें ॥ २ ॥

Ends.— fol. 35^a

चंदणयणचर चचरचयण चंदणचंदणकेशरचरचयणं
जपमाली जप जाप जपमाली जपमाली जपजापभणं ॥
फरसी करि गदा गदा धरि फरिसी फरसी पंचकल्याणकरं
विनायक ! जयो जयो विनायक ! विनायक ! जयकारकरं
॥ ८ ॥ कलश ॥
विनायक ! जयकार नखुवर हीयण विख्याता ॥
सेवंतां सह शकति कुशुमचंद णयण राता ॥
पाट चमर छत्र सदा सोहे ॥
गदा फरसि मोदिक जुगति कर जपमालाधरणं ॥
धुंण ग्यांन गीत मंगल धवल राजकाज सेवो सुकरि ॥
कहे अचल वर द्यो सदा विनायक ! जयकार करि ॥ ९ ॥
इति श्रीगणपतिपाहाडगतिछंद संपूर्णः ॥

गणेशच्छन्द — Gaṇeśacchanda

No. 122 — 575 (40). / 1895–98.

Extent.— fol. 35^a to fol. 35^b.

Description.— Complete ; 10 verses in all. For other details see Namaskāramantra (Vol. XVII, pt. 3, No. 737).

Author.— Abherāma. Is he Jaina ?

Subject.— A hymn in honour of Gaṇapati, son of Gaurī.

Begins.— fol. 35^a

जय जय गणनायक नव निधि दायक ऋद्धि विनायक बलवंता
वाचासिद्धिवायक सब विधि लायक भगति सदायक भगवंता ॥
कलिमलभयघायक दुष्टदहायक सुखउपजायक शुभकरणं
जय जय जगवंदन विघननिकंदन गवरीनंदन तुम सरणं ॥ १ ॥
अतियोनि उजासा प्रगट प्रकासा वाकनिलाशा सुखराशा
विद्यागुणवासा ध्याननिवासा पूरण आसा निज दासा ॥
मेटण यमत्रासा दरिद्रविनासा संकटनाशा सुखकरणं
जय जय० ॥ २ ॥

Ends.— fol. 35[b]

मंदिर महिलाणं माणिरतनाणं
जलहलभाणं साहिसाणं
दूर गेद्दीचाणं धुरत नीसाणं ।
जोडत पाणं झुरियाणं
समरस झुनियाणं रटत धुराणं
वेदवषाणं भावरणं जय० ॥ ९ ॥
पोह्रोकरणन्यातं जगविष्यातं कुलकह्लाड(ड़)षोतिमणं ।
'योधाणें' ग्रामं कवि अभेरामं गावत मंगल छंदगुणं ॥
अन वस्त्र अपारं भरत भंडारं नित प्रति मंगलच्या रयणं ।
जय० ॥ १० ॥
इति श्रीगणे(श)सछंद समासं ॥

गिरिनारगिरिमण्डन-
नेमिजिनस्तव

Girināragirimaṇḍana-
Nemijinastava

No. 123

1252 (2).
1886-92.

Extent.— fol. 1[b] to fol. 2[a].

Description.— Complete ; 17 verses in all. For other details see No. 12.

Author.— Somasundara Sūri. I am inclined to identify him as the author of Aṣṭādaśastavī (vide p. 32).

Subject.— A hymn in honour of Lord Nemi, an ornament to Mount Girnar.

Begins.— fol. 1[b]

श्रीमद्'रैवतका'भिधाननगभूभूपैकभूषामणो(णे !)
श्रीमन्नेमिविभो ! भवारिभवभीनिर्भेदभेदस्वल- ।
भक्तिव्यक्तिवशो[:]ल्लसद्बहुलसद्रोमांचचंचद्वपुः
स्वामिन्नज्ञतमोऽपि विज्ञपयति त्वां किंच नाथं जनः ॥ १ ॥
निस्सीमोत्तमचंगिमागुणगणः क्वासौ तवासौख्यद्व-
त्रि(:)सारा वचसां भराः क्व च ममेमे स्वच्छतुच्छात्मनः ।
एवं सत्यपि भक्तितः प्रलपितान्येतानि वाक्यानि मे
देवाकर्ण्णयितुं त्वमर्हसि यतो जातो(ऽ)सि सर्वंसहः ॥ २ ॥

Ends.— fol. 2ª

एवं मंदधिया मया(ऽ)पि किमपि स्वामिन् ! स्तुतेर्गोचरं
नीतो(ऽ)सि स्वमतिप्रकल्पिवचोन्यासे(सै)रसारैरपि ।
त्रैलोक्यैकगुरुं भवंतमपरं याचे न किंचिद् वरं
किंत्वेका भवदीयपादयुगलोपास्तिद्द(ई)ढैवास्तु मे ॥ १६ ॥
इति गिरि'गिरिनारो'त्तुंगशृंगावतंसं
जिनवरमिह नेमिं या(यो) जनोऽनन्यचेताः ।
निजहृदयजभक्तिप्रेरितः स्तौति नित्यं
शिवसुखमचिरेणाप्यश्नुतेऽसावनंतं ॥ १७ ॥

इति श्रीगिरिनारगिरिमंडनश्रीनेमिजिनस्तवः ॥ छ ॥ श्रीसोमसुंदरसूरिकृतः ॥ छ ॥

गिरिनारगिरिमण्डन-नेमिजिनस्तव — **Girināragirimaṇḍana-Nemijinastava**

No. 124 — 1154 (b). / 1887–91.

Extent.— fol. 1ᵇ to fol. 2ᵇ.

Description.— Complete ; 17 verses in all. For other details see No. 13.

Begins.— fol. 1ᵇ

श्रीमद्'रैवतका'भिधान etc. as in No. 123.

Ends.— fol. 2ᵇ

एवं मंदधिया etc. up to सावनंतं as in No. 123. This is followed by the line as under :—

॥ १७ ॥ इति श्रीगिरिनारगिरिमंडनश्रीनेमिजिनस्तवः ॥ छ ॥
श्रीसोमसुंदरसूरिकृतः ॥ छ ॥ २ ॥

N. B.— For other details see No. 123.

गुरुपारतन्त्र्यस्तोत्र
(गुरुपारतंतथोत्त)
[मयरहियथोत्त]
[स्मरणा]

Gurupāratantryastotra
(Gurupāratantathotta)
[Mayarahiyathotta]
[Smaraṇā]

No. 125 — 1220 (55). / 1884-87.

Extent.— fol. 198ᵃ to fol. 198ᵇ.

Description.— Complete ; 21 verses in all. For other details see Pratyākhyānaniryukti (Vol. XVII, pt. 3, No. 1072).

Author.— Jinadatta Sūri. For details see Vol. XVII, pt. 5, p. 4.

Subject.— A Prakrit hymn dealing with obedience to and eulogy of the following teachers : –

(आर्य)सुधर्मन्, देवसूरि, नेमिचन्द्रसूरि, उद्द्योतनसूरि, वर्धमानसूरि, जिनेश्वरसूरि, जिनचन्द्रसूरि, अभयदेवसूरि and जिनवल्लभसूरि.

Begins.— fol. 198ᵃ

मयरहियं गुणगणरयणसायरं सायरं पणमिऊणं ।
सुगुरुजणपारतंतं उवहि व्व थुणामि तं चेव ॥ १ ॥
निम्महियमोहजोहा निहयविरोहा पणट्ठसंदेहा ।
पणयंगिवग्गहा(दा)वियसुहसंदो(दो)हा सगुणगेहा ॥ २ ॥ etc.

Ends.— fol. 198ᵇ

विप्फुरियपवरपवयणसिरोवूढदुव्वहखमो य ।
जो सेसाणं सेसु व्व सहय(इ) सत्ताण ताणकरो ॥ २० ॥
सच्चरियाणमहीणं सुगुरु(रू)णं पारतंतमुव्वहइ ।
जयइ जिणदत्तसूरी सिरिनिलउ(ओ) पणयमुणितिलउ ॥ २१ ॥
स्मरणा ॥ ७ ॥

Reference.— This hymn along with its Sanskrit rendering is published in Apabhraṁśakāvyatrayī on pp. 107-109. Here this hymn is named as *Sugurupāratantrya*. Further, this hymn along with Samayasundara's Sukhāvabodhā is embodied in श्रीसप्तस्मरणस्तव published by श्रीजिनदत्तसूरिज्ञानभंडार from Surat in A.D. 1942. Moreover, this hymn occurs also in "श्रीपंचप्रतिक्रमणसूत्राणि विधिसहितानि" on pp. 363-365 published by श्रीजिनदत्तसूरिज्ञानभण्डार in A. D. 1945.

For additional Mss. of the text, see Jinaratnakośa (Vol. I, p. 108).

गुरुपारतन्त्र्यस्तोत्र Gurupāratantryastotra

No. 126 1106 (60). / 1891-95.

Extent.— fol. 24^{a} to fol. 24^{b}.

Description.— Complete; 21 verses in all. For other details see Namaskāramantra (Vol. XVII, pt. 3, No. 736).

Begins.— fol. 24^{a}

मह(य)रहियं etc. as in No. 128.

Ends.— fol. 24^{b}

सच्चरिआणमहीणं etc. up to मुणितिलओ as in No. 128. This is followed by the line as under: —

२१ इति गुरुपारतंत्रस्मरणं ॥

N. B.— For other details see No. 125.

गुरुपारतन्त्र्यस्तोत्र Gurupāratantryastotra

No. 127 627 (e). / 1899-1615.

Extent.— fol. 7^{a} to fol. 8^{a}.

Description.— Complete; 21 verses in all. For other details see Ajita-Śānti-stava (Vol. XVII, pt. 4, No. 1168).

Begins.— fol. 7^{a}

मयरहियं गुणगण etc. as in No. 128.

Ends.— fol. 8^{a}

सच्चारियाणमहीणं etc. up to मुणितिलओ as in No. 128. This is followed by the line as under :—

॥ २१ ॥ इति श्रीगुरुपारतंत्रनामः पंचमं स्मरणं ॥ ॥

N. B.— Fot other details see No. 125.

गुरुपारतन्त्र्यस्तोत्र
वृत्ति सहित

Gurupāratantryastotra
with vṛtti

No. 128

1229 (e).
1891-95.

Extent.— fol. 29ª to fol. 33ᵇ.

Description.— The 31st fol. has in the centre a square with its diagonals vertical. For other details see Bodhidīpikā (Vol. XVII, pt. 4, No. 1178). Both the text and the commentaty complete.

Author of the commentary.— Not mentioned.

Subject.— The Prākrit text along with its explanation in Sanskrit.

Begins.— (text) fol. 29ᵇ

मयरहियं गुणगणरयणसायरं सादरं पणमिऊणं ।
सुगुरुजणपारतंतं उवहि व्व थुणामि तं चेव । १ ॥ etc.

" — (com.) fol. 29ª

देवाधिदेवं प्रणिपत्य वीरं सूरीश्वरं श्रीजिनदत्तसूरीं(रिं) ।
तन्निर्मितश्रीगुरुपारतंत्र्यस्तवस्य वृत्तिं विदधे सुबोधं ॥ १ ॥ etc.

Ends.— (text) fol. 33ª

सच्चरियाणमहीणं सुगुरु(रू)णं पारतंतसु(मु)व्वहइ ।
जयइ जिणदत्तसूरी सिरिनिलउ पणयमुणितिलओ ॥ २१ ॥

" — (com.) fol. 33ᵇ श्रीनिलयः श्रीस्थानं प्रणतमुनितिलकः अथ च श्री-जिनदत्तसूरिरिति कवेर्न(र्ना)मि(मे)ति सूचितमस्ति ज्ञेयमिति गाथाद्वयार्थः ।
इति श्रीगुरुपारतंत्र्यस्तववृत्ति संपूर्णा ।

गुरुपारतन्त्र्यस्तोत्र

Gurupāratantryastotra

No. 129

232 (e).
A. 1882-83.

Extent.— fol. 14ª to fol. 16ª.

Description.— Both the text and its commentary complete. The former contains 21 verses. For other details see Vol. XVII, pt. 4, No. 1182.

Author of the commentary.— From Jinaratnakośa (Vol. I, p. 108) it seems that the author is Jayasāgara Gaṇi. Is this true ? Is this commentary composed in Saṁvat 1358 as stated in Jaina Granthāvalī (p. 276) ?

Subject.— The text together with its elucidation in Sanskrit.

Begins.— (text) fol. 14ª

मयरहियं etc. as in No. 128.

„ — (com.)

देवाधिदेवं etc. as in No. 128.

Ends.— (text) fol. 16ª

सच्चरियाणमहीणं etc. as in No. 128.

„ — (com.) श्रीनिलयः श्रीस्थानं etc. up to वृत्तिः संपूर्णा । This is followed by the line as under :—

श्रीसागरचंद्रसूरिप्रसादात् ।

N. B.— For other details see Nos. 125 & 128.

गुरुपारतन्त्र्यस्तोत्र
वृत्ति सहित

Gurupāratantryastotra
with vṛtti

No. 130

1241 (e).
1891-95.

Extent.— fol. 47ᵇ to 52ᵇ.

Description.— Both the text as well as its commentary complete. For other details see Vol. XVII, pt. 4, No. 1173.

Age.— Saṁvat 1868.

Author of the commetary.— From Jinaratnakośa (Vol. I, p. 108) the author seems to be Dharmatilaka. Is it so ?

Subject.— The text.

Begins.— (text) fol. 47ᵇ

मयरहियं etc. as in No. 128.

„ — (com.)

देवाधिदेवं etc. as in No. 128.

Ends.— (text) fol. 52^a

सच्चरियाणमहीणं etc. as in No. 128.

„ — (com.) श्रीनिलय(:) संस्थानं etc. up to वृत्ति संपूर्ण । as in No. 128.

N. B.— For other details see Nos. 125 & 128.

गुरुपारतन्त्र्यस्तोत्र वृत्ति सहित — Gurupāratantryastotra with vṛtti

No. 131 — $\frac{851 (e).}{1895-1902.}$

Extent.— fol. 24^a to fol. 27^b.

Description.— Both the text and the commentary complete. For other details see No. $\frac{851 (a).}{1895-1902.}$.

Begins.— (text) fol. 24^b

मयरहियं गुणगण etc. as in No. 128.

„ — (com.) fol. 24^a

देवाधिदेवं प्रणिपत्य वीरं etc. as in No. 128.

Ends.— (text) fol. 27^b सच्चरियाणमहीणं etc. up to सुणितिलउ । २१ as in No. 128.

„ — (com.) fol. 27^b श्रीनिलयः श्रीस्थानं etc. up to गाथाक्षरार्थः as in No. 128. This is followed by

॥ २१ इति श्रीगुरुपारतंत्र्यस्तववृत्तिः संपूर्णे(र्णा) ॥ छ ॥

N. B.— For other details see Nos. 125 & 128.

गोडीगीत — Godīgīta

No. 132 — $\frac{1406 (8).}{1891-95.}$

Extent.— fol. 6^a to fol. 7^a.

Description.— Complete ; 11 verses in all. For other details see Māṇikyasvāmistava No. $\frac{1406 (6).}{1891-95.}$.

Author.— Kalyāṇasāgara Sūri. He is the author of Godī-Pārśvāṣṭaka (No. 135). He seems to be the author of Goḍīgīta (No. 133), too.

Subject.— Eulogy of Lord Pārśva of Goḍī, a city, in various metres.

Begins.— fol. 6^a

जयति जगति चंद्रः पार्श्वा(र्श्वं)नामा जिनेंद्रो
विकचकमलदृष्ट्यानंदितामर्त्यमर्त्यः ।
अकलितमहिमौघस्तीर्णसंसारसिंधु-
र्भुजगकलितपादः पुण्यपीयूषपू(पु)ष्टं(ष्टः) ॥

मालिनीच्छंदः

श्रीपार्श्वं 'गौडिका'ख्यं भजन(त) भविगणे कल्पवृक्षं सुगोत्रं
नानादेशेषु लब्ध्वा(ब्धा)तिशयमहितताव्यूद(ह)वारं सुमूर्त्तिं ।
श्रीमंतं नीलरत्नाधिकतरवपुषं स्फारलावण्यशीलं
मोहांधो(? भो)राद्रि(? शि)कुंभोद्भवममरनुतं पार्श्व-
यक्षार्चितांहि(ह्रिं) ॥ २ ॥

अ(स्र)ग्धराछंदः

Ends.— fol. 6^b

स्तोत्रं पार्श्वजिनेश्वरस्य सततं ये प्राणिनो भावतः
सद्बुद्ध्या(ऽ)पि पठंति हृष्टमनसस्तेषां गृहे संपदः ।
स्युर्नित्यस्थिरभावशोभनतरा धर्म्मार्थनिष्पादिका(:)
कल्याणार्णवसूरिभिर्विरचितं मांगल्यमालाकरं ॥ १० ॥

शार्दूलविक्रीडितच्छंदः

सदा धार्य्यं(र्य्यं) चित्ते स्तवनमनवद्यं भयहरं
नरैर्नूनं सिद्ध्यै कुशलवनराजौ घननिभं ।
अवंध्यं भक्तानां जिनगुणरतानां स्मृतिमतां
समेषां भव्यानां प्रमुदकरणं कामितकरं ॥ ११ ॥

शिखि(ख)रिणीवृत्तम्

इति श्रीगोडीगीतं

Reference.— Published in Prakaraṇaratnākara (Vol. II, pp. 102–103) published in A. D. 1876.

गोडीगीत Godigīta

No. 133 $\frac{1406\ (11)}{1891\text{–}95}$

Extent.— fol. 7ᵇ to fol. 8ᵇ.

Description.— Complete; 17 verses in all. For other details see Māṇikyasvāmistava No. $\frac{1406\ (1)}{1891\text{–}95}$.

Author.— Kalyāṇasāgara Sūri. If so, he is the author of No. 132.

Subject.— A song in honour of Lord Pārśva of the city of Goḍī.

Begins.— fol. 7ᵇ

'गोडी'पुरप्रभुपार्श्वममंदं
दर्शनदर्शनपरमानंदं
नमितसुरासुरवृंदं ॥ १ ॥
श्रीजिनशासनचारुशृंगारं
अंतरंगरिपुवृक्षकुठार(रं)
सकलजगदाधारं ॥ २ ॥

Ends.— fol. 8ᵃ

वंदे(ऽ)नंतचतुष्टयिराजं
पूजित[त]सुरपतिमानवराजं
प्रवरतीर्थाधिराजं ॥ १६ ॥

कुलकं

शिवतातिपार्श्वं वरदवरपार्श्वं मोहतिमिरसवितारं
नागराजराजं त्रिभुवनपूजं लब्धभवोदधिपारं ।
'शुभसागर(रँ) नित्यं(त्य)प्रथितगारिमाणं ये ध्यायंति विभुं सुदा
लक्ष्मीस्तान् समुपैति सत्वरमतुला सर्वार्थसिद्धिप्रदा ॥ १७ ॥
इति गोडीगीतं

Reference.— Published in Prakaraṇaratnākara (Vol. II, p. 105) noted on p. 153.

गोडीपार्श्वनाथस्तवन Godī–Pārśvanātha-stavana

No. 134 609 (d). / 1892–95.

Extent.— fol. 15

Description.— Complete ; 4 verses in all. For other details see Saṅkheśvara–Pārśvajina-stavana No. 609 (a). / 1892-95.

Author.— Not known.

Subject.— A hymn in honour of Godī–Pārśvanātha in Vernacular.

Begins.— fol. 15ᵃ

तुम विना मेरी कुंण सुद्ध लेनहार हें प्रभु० ।
निसदिन ध्यांन धरुं कीजें युं अवार हें
पार्श्वनाथ साहिबजीको सार हें ॥ प्रभु० ॥ १ ॥

Ends. – fol. 15ᵃ

तुम वि० ।
मेरे तो प्रभु एक तुम सेवक हजार हें ।
अश्वसेननंदनजीसुं मेंरो पूर्ण प्यार हें ॥ ४ ॥
तुम विना० ॥

इति गोडीस्तवनं ॥

Reference.— Is this work same as *Godījinastavana* noted in Jinaratnakośa (Vol. I, p. 109) ?

गोडीपार्श्वाष्टक Godī–Pārśvāṣṭaka

No. 135 1406 (7). / 1891–95.

Extent.— fol. 5ᵇ to fol. 6ᵃ.

Description.— Complete ; 11 verses in all. For other details see Māṇikyasvāmistava No. 1406 (1). / 1891–95.

Author.— Kalyāṇasāgara Sūri. For his other work see No. 132.

Subject.— A hymn in honour of Lord Pārśva of Godī. The first eight verses are in शार्दूलविक्रीडित.

Begins.— fol. 5^b

वामेयं 'मरु'देशभूषणतरं श्रीपार्श्वयक्षार्चितं
कल्याणावलिवल्लिसिंचनघनं श्रीक्ष्वाकुवंशोद्भवं ।
आराद्‌ राष्ट्र(ष्ट्र)समागतैर्नरवरैः संसेवितं नित्यशः
श्रीमच्छ्रीकरगौडिकाभिधधरं पार्श्वं सुपार्श्वं [1]जिने ॥ १ ॥
नानासाधुजनौघपंकजवने [2]मां क्षं कुवाथिनं
विघ्नव्यूहनिवारवा(कं) कलियुगे प्राप्तप्रतापालयं ।
विश्वस्यां प्रथितावदाननिकरं निर्दोषपुण्योज्ज्वल(लं)
श्रीमच्छ्री० ॥ २ ॥

Ends.— fol. 6^a

श्रीमता(तः) पार्श्वनाथस्य स्तवनं जगतोऽवनं ।
कल्याणसागराधीशैः सूरिभी रचितं मुदा ॥ १०॥
ध्येयं श्रीपार्श्वदेवं भजत किल जना ! 'गोडिक'ग्रामराजं
शस्व(श्व)त्सर्वार्थसिद्ध्यै विहितशुभहितं विष्टपै(पे) चैत्रपूर्वे ।
सानंदोल्लासलक्ष(?ष्टाः) कुशलगविबुधाः सर्वलोके विशिष्टा
निर्दोषाचारपुष्टा जिनपपतिषु रता [3]आप्तकल्याणतुष्टा(:) ॥ ११ ॥
श्रीगोडिकपार्श्वाष्टकम् ।

Reference.— Published in Prakaraṇaratnākara (Vol. II, pp. 101–102) noted on p. 153.

गौडीपार्श्वनाथच्छन्द
मोतीदामस्तुति

Gauḍī-Pārśvanāthacchanda
motīdāmastuti[1]

No. 136

575 (10).
1895–98.

Extent.— fol. 5^b to fol. 7^a.

Description— Complete ; 29 verses in all. For other details see Namaskāramantra (Vol. XVII, pt. 3, No. 737).

Author.— Karpūraśekhara, a devotee of Vācaka Ratnaśekhara.

---

1 In the printed edition we have : " भजे ".
2 The correct reading is " मार्तण्डबिम्बायितं "
3 The author has indirectly suggested his name.

Begins.— fol. 5^b

ॐअक्षर २ अक्षर अतुल। अकल अपार अनंत ॥
परम ज्योति प्रणमुं प्रगट। माहिमामेय महंत ॥ १ ॥ etc.

Ends.— fol. 7^a

दीजीइ लछि लीला लहिर। प्रबल पुन्यअंकूर भर ॥
वाचक रत्नशेखर भणो। सौ कहै कपूर आनंद कर ॥ २९ ॥
इति श्रीकपूंरशेखरकृत श्रीगौडीपार्श्वनाथछंद मोतीदामस्तुति सं० ।

ग्रहार्चनमन्त्र | **Grahārcanamantras**

No. 137 | 1099 (a). / 1891–95.

Size.— $11\frac{5}{8}$ in. by $5\frac{1}{4}$ in.

Extent.— 13 folios; 9 lines to a page; 28 letters to a line.

Description.— Country paper thick, tough and white ; Jaina Devanāgarī characters ; big, quite legible, uniform and very good hand-writing ; borders ruled in two lines and edges in one in red ink ; daṇḍas written in the same ink ; foll. numbered in both the margins ; fol. 1^a blank ; so is the fol. 13^b ; condition very good ; complete ; this work ends on fol. 1^b ; this Ms. contains in addition the following works :—

(1)	नक्षत्रार्चन	fol. 1^b
(2)	शासनार्चनविधान(?)	,, 2^a to fol. 2^b
(3)	इन्द्रार्चनविधान	,, 2^b ,, ,, 3^b
(4)	दिक्पालार्चनविधान	,, 3^b
(5)	चतुर्विंशतियक्षविधानार्चन	,, 3^b ,, ,, 4^a
(6)	अनार्हतार्चन (?)	,, 4^a
(7)	पद्मावतीदेवीपूजास्तोत्र	,, 5^a ,, ,, 6^b
(8)	पद्मावतीस्तोत्र	,, 6^b ,, ,, 10^a
(9)	मण्डलवहि	,, 10^b
(10)	दिक्पालार्चन	,, 12^a
(11)	नवग्रहपूजा	,, 12^a ,, ,, 13^a.

Age.— Not very old.

Author.— Not mentioned.

Subject.— Worship of planets.

Begins & Ends.— fol. 1^b

अथ मंत्रा णि(लि)रूयंते: ॥
ग्रहाः ! संशष्ट येषुष्मानायात सपरिच्छदाः ! ।
अत्रोपविशतैतान् वो यजे प्रत्येकमादरात् । १ ॥
यस्यार्थे क्रियते कर्म्म स प्रीतो नित्यं मस्तुते ।
शांतिकं पौष्टिकं चैव सर्व्वकार्य्येषु सिद्धिदः ॥ २ ॥

घण्टाकर्णस्तोत्र — Ghaṇṭākarṇastotra

No. 138 — $\frac{1003\ (67).}{1887\text{–}91.}$

Extent.— fol. 203^a.

Description.— Complete; 4 verses in all. For other details see Mallināthapūjā No. $\frac{1003\ (1).}{1887\text{–}91.}$

Author.— Not mentioned.

Subject.— Eulogy of Ghaṇṭākarṇa Mahāvīra, a god devoted to the Jaina church.

Begins.— fol. 203^a अथ घंट्टाकर्णस्तोत्र लिष्यते ॥

ॐ घंटाकर्णो(र्ण !) महावीर ! सर्वव्याधिविनाशकः ।
विस्फोटकभयं प्राप्ति(प्ते) ! रक्ष रक्ष महाबल ! ॥ १ ॥ etc.

Ends.— fol. 203^a

नाकाले मरणं तस्य न च सर्पेण डस्यते ।
अग्निचो(चौ)रभयं नास्तिः ॥ ऱ्हीँ श्री ँ घंटाकर्णो नमो(ऽ)स्तु ते
ठः ठः ठः स्वाहा ॥ ४ ॥

इति घंटाकरणस्तोत्र संपूर्ण ॥

Reference.— Published on p. 100 in the [1] edition containing the following works:—

देवचन्द्रजीकृत स्नात्रपूजा & अष्टप्रकारीपूजा, जिननवअंगपूजा. शान्तिनाथकलश etc.

---

1 This edition is published as "श्रीमोहनयशास्मिद्धिस्मारक-ग्रन्थमाला, प्रथम पुष्प" in Vikrama Saṁvat 2008 (A. D. 1952). Herein, a photo of Ghaṇṭākarṇa Mahāvīra is given on a page facing p. 97.

चक्रेश्वरीस्तोत्र — Cakreśvarīstotra

No. 139 $\frac{575\ (19).}{1895\text{–}98.}$

Extent.— fol. 24^a to fol. 24^b.

Description.— Complete ; 8 verses in all. For other details see Namaskāramantra (Vol. XVII, pt. 3, No. 737).

Author.— Śaṅkarācārya.

Subject.—A hymn in honour of Cakreśvarī, a goddess devoted to the *tīrtha* of Lord Ṛṣabha.

Begins.— fol. 24^a श्रीपरमज्योतीर्महामायी नमो नमः

श्रीचक्रे ! चक्रभीमे ! ललितवरभुजे ! लीलयोल्लालयंती
चक्रं विद्युत्प्रकाशं ज्वलितशखशिखं खे खगेंद्राधिरूढे ! ।
तत्त्वैरुद्भूतभावैः सकलगुणनिधे ! त्वं महामंत्रमूर्ते !
[1]कोट्यादित्यप्रतापे ! त्रिभुवनमहिते ! पाहि मां देवि ! चक्रे ! ॥१॥
क्लीँ क्लीँ क्लीँकारचित्ते ! किलिकिलिवदने ! दुंदुभीभीमनादे !
ह्रीँ हूँ हः सः सबीजे ! खगपतिगमने ! मोहिनी शोषिणी त्वं ।
त्वच्चक्रं देवि ! चक्रे ! भ्रमति जगति दिग्चक्रविक्रांतकीर्त्ति-
र्विघ्नो(घ्नौ)घं(घं) विघ्नयंती विजयजयकरी पाहि मां देवि ! चक्रे ! ॥२॥

Ends.— fol. 24^b

ॐ ह्राँ ह्रूंकारमंत्रे कलिमलमथने दुष्टवश्याधिकारे
ह्राँ ह्रूं ह्रः यः प्रघो(घो)षे प्रलययुगजराजेयशब्दप्रणादे !
याँ याँ याँ क्रोधमूर्ते ! ज्वलज्वलज्वलिते ! ज्वालमंज्याललीढे
आ ईँ ओँ अँः प्रघो(?घो)षे ! प्रकटितदशने ! पाहि मां देवि ! चक्रे ! ॥८॥

इति श्रीशंकराचार्यविरचितं चक्रेश्वरीस्तोत्रम् ।

Reference.—Published in Jaina-stotra-samuccaya (pp. 141–142).

चक्रेश्वरीस्तोत्र (?) — Cakreśvarīstotra (?)

No. 140 $\frac{925\ (\ \ ).}{1892\text{–}95.}$

Extent.— fol. 91^b to fol. 92^a.

Description.— Complete ; 4 verses in all. For other details see Iṣṭopadeśa No. $\frac{925\ (1).}{1892\text{–}95.}$

Author.— Not mentioned.

---

1 In the printed edition we have : क्रोधादित्यप्रतापे ! ".

Subject.— A hymn of Cakreśvarī (? Padmā) of Lord Ṛṣabha.

Begins.— fol. 91^{b} ॐ नमः सिद्धेभ्य। श्रीमर्हं।

... चक्रस्फुटमुकटतटीदिव्यमाणिक्यमाला।
ज्योतिर्ज्वालाकराला स्फुरिततिमिरिकाघृष्टपादारविंदो॥
व्याघोरुल्कासहश्रद्वलदलनशिवालोलपाशांकुसाह्वै-
आक्रांदींमंत्ररूपं क्षपितकलिमले ! रक्ष मां देवि ! पद्मे ! ॥१॥ etc.

Ends.— fol. 91^{b}

भृंगी काली कराली परिजनरहिते ! यत्र वा तुंड नित्यं।
क्षीं क्षीं क्षुं क्षुं क्षणार्द्धं क्षतिरिपुनिवहे र्हीमहामंत्रवश्ये ! ॥
ॐ भ्रां भ्रु भृंगसंगे ! भृकुटिपुटतटे ! त्रासितोद्दामदैत्यै।
ज्झी ज्झी ज्झू ज्झू प्रचंडे ! स्तुतिशतमुखरे ! रक्ष मां[1] ॥ ४

चतुरार्थिस्तुति स्वोपज्ञ विवरण सहित

Caturarthistuti with svopajña vivaraṇa

No. 141

787 (a).
1899-1915.

Size.— 10½ in. by 4⅜ in.

Extent.— 21 folios; 13 lines to a page; 44 letters to a line.

Description.— Country paper thin, rough and white; Jaina Devanāgarī characters with occasional पृष्ठमात्राs; sufficiently big, quite legible, uniform and good hand-writing; borders ruled in three lines in red ink; foll. numbered in the right-hand margin; fol. 1^{a} blank except that the title etc. written on it as जंमकस्तुति पां २१ डा. १४ त्रा. ८; white pigment used on fol. 21^{b}; both the text and the commentary complete; the latter ending on fol. 3^{b}; this Ms. contains an additional work viz. यमकस्तुति with वृत्ति commencing on fol. 3^{b} and ending on fol. 21^{b}.

Age.— Saṁvat 1648.

Author of the text.— Somatilaka Sūri. Is he one of the four pupils of Somaprabha Sūri (see Vol. XVII, pt. 5, p. 210)? If so, he has composed - नव्यक्षेत्रसमास (387 verses), विचारसूत्र and सप्ततिशतस्थानक. Further, he has commented upon *Yamakastuti* of his guru and on *Jīyakappa*.

---

1 Are the missing words "देवि ! पद्म !" ?

Author of the com.— Same as that of the text.

Subject.— A hymn having four meanings. It is an eulogy of any one *Tīrthaṅkara,* all the *Tīrthaṅkaras,* the Jaina canon and a god attached to the Jaina church.

Begins.— (text) fol. 1^b

श्रीतीर्थराजः पदपद्मसेवा-
हेवाकिदेवासुरकिंनरेशः ।
गंभीरगीस्तारतरावरेण्य-
प्रभावदाता ददतां शिवं वः ॥ १ ॥

,, — (com.) fol. 1^b ए६0 ॥ ॐ नमः ॥ सिद्धं अर्हं ॥ ए६0 ॥

श्रीमत्तीर्थपतीन् सर्वाननर्वाचीनाचिन्मयान् ।
अद्वैतसंविदे वंदे सान(नं)देन स्वचेतसा ॥ १ ॥
अधिकृत्य श्लेषमहं प्रकृतिप्रत्ययविभक्तिवचनाद्यं ।
एकामपि हि चतुर्धा विवृणोमि स्तुतिमिमां सुकृतां ॥ २ ॥

सा चेयं. This is followed by the first verse noted above and then we have :—

व्याख्या । श्रीतीर्थराजः । श्रिया चतुस्त्रिंशदतिशयसमृद्धिरूपया । etc.

Ends.—(text) fol. 1^b (श्रीतीर्थराजः etc.)

,, — (com.) fol. 3^b इह च श्रीतीर्थराजः पदपद्मसेवाहेवाकित्वात् सम्यग्-दृष्टित्वं तारतरत्वात् स्वनिकायेषु वैशिष्ट्यं । अवरेण्ये प्रभावदतत्वात् धार्मिकाणां विघ्नसंघातविघातकत्वादिकं च देवासुरकिंनरेश्वराणं प्रकाशितमिति चतुर्थस्तुत्यर्थः ॥ ४ ॥ छ ॥

श्रीसोमती(तिं)लकसूरिः स्तुतिमित्येकामपि स्वयं रचितां ॥
विवृणोति स्म चतुर्द्धा श्लेषवशात् स्वपरहितकृताय ॥ १ ॥
इत्येकरूपस्तुतिचतुष्टयवृत्तिः समर्थितेति भद्रं ॥ छ ॥

